# Shri Hayanana Vimshatih

# શ્રીહયાનનવિંશતિઃ

## Document Information

Text title : Hayanana Vimshatih

File name : hayAnanaviMshatiH.itx

Category : vishhnu, viMshati

Location : doc_vishhnu

Transliterated by : Chandrasekhar Karumuri

Proofread by : Chandrasekhar Karumuri

Latest update : August 18, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 24, 2023

*sanskritdocuments.org*

# શ્રીહયાનનવિંશતિઃ

ધ્યાનમ્ (સ્તુતિ પ્રશંસઃ -
વન્દેઽહં વાગધીશાનં વેદાન્તસ્તુતવૈભવમ્ ।
વિદ્યાસમ્પત્પ્રદં લક્ષ્મીહયગ્રીવં દયાનિધિમ્ ॥

યો બ્રહ્માણં વિદધાતિ પૂર્વં યો વૈ વેદાંશ્ચ પ્રહિણોતિ તસ્મૈ ।
તગ્ં હ દેવમાત્મબુદ્ધિપ્રકાશં મુમુક્ષુર્વૈ શરણમહં પ્રપદ્યે ॥

અથ શ્રીહયાનનવિંશતિઃ ।
સ્વસ્તિ વસ્તુ દિશતાદ્ધયવક્ત્રં કિઞ્ચિદબ્જસદૃશાક્ષ મનન્તમ્ ।
યત્કટાક્ષપરિપાતવશેન જ્ઞાનવાન્ ભુવિ ભવેત્ ખલુ જન્તુઃ ॥ ૧॥

રક્ષોહૃતવેદતયા સ્રષ્ટારં કલુષિતાન્તરં દેવઃ ।
રક્ષોહનનેન ચ યો નિગમેનાતૂતુષત્ સ પાત્વસ્માન્ ॥ ૨॥

મધુકૈટભહન્તૃ રમાધરં વિલસદબ્જસુદર્શનદોર્યુગમ્ ।
રમતાં હૃદયે તુરગાનનં કિમપિ સુન્દરમવ્યયવસ્તુ મે ॥ ૩॥

કાચિન્મૂર્તિર્વાસુદેવસ્ય શુભ્રા લક્ષ્મીવિદ્યુચ્છારદામ્ભોરુહાભા ।
વાગીશાના વાજિવક્ત્રાઽતિલોકા ચિત્તેઽસ્માકં નૃત્યતાદ્વર્તમાના ॥ ૪॥

સિતસ્ફટિકભાસુરે સરસિજે નિષણ્ણં વિભું
    કરાગ્રધૃતપુસ્તકં કમલયા સમાલિઙ્ગિતમ્ ।
હિમાંશુસદનં પ્રતિસ્વનિતરોદસીહેષકં
    હયાનનમનુત્તમં સતતમન્તરીડીમહિ ॥ ૫॥

અસ્તુ મેઽદ્ય હૃદયે કમલાધૃત્ વસ્તુ કિઞ્ચિદરવિન્દનિભાક્ષમ્ ।
પ્રસ્તુતાર્થદમનુત્તમમેવં કસ્તુ ચેન્મમ પુરો વિજયી સ્યાત્ ॥ ૬॥

હૃદ્યા લક્ષ્મીર્વાજિવક્ત્રસ્ય રક્ષેત્ હૃદ્યા ભક્તિર્વાજિવક્ત્રસ્ય મેઽસ્તુ ।
હૃદ્યા પ્રીતિર્વાજિવક્ત્રસ્ય ભૂયાત્ હૃદ્યાસ્તાં મે વાજિવક્ત્રસ્સપદ્મઃ ॥ ૭॥

તુરઙ્ગવદનાય તે નિખલવાક્પ્રપઞ્ચેશિને
    નમોવચનમહિમપ્રબલવિઘ્નનિર્વાપિણે ।
તનોતુ શુભમીયિવાંસમતિશીતનેત્રાબ્રુહો
    ભવા નિમમકિઞ્ચનં દૃઢતરં નિરીક્ષ્ય સ્વયમ્ ॥ ૮॥

લક્ષ્મીનટ્યા મે હૃદબ્જાખ્યરઙ્ગે વિદ્યાખ્યાયા નાટિકાયાઃ પુરસ્તાત્ ।
સર્વાલઙ્કારૈશ્ચમત્કારિતાયાઃ સૂચ્યાત્ સ્થિત્વા સૂત્રધારો હયાસ્યઃ ॥ ૯॥

પ્રકટિતનિજહેષારૂપભક્તાભિકાઙ્ક્ષં
    કરધૃતદરચક્રં દુષ્ટસંહારદક્ષમ્ ।
ઉરસિ નિવસદબ્જાઽશ્લિષ્ટમમ્ભોરુહાક્ષં
    ભજત તુરગવક્ત્રં સ્વાશ્રિતારક્ષદીક્ષમ્ ॥ ૧૦॥

પ્રીતિં દધાતુ મયિ વાગધિપઃ પ્રકામં
    પદ્માસખઃ પરમકારુણિકોઽબ્જનાભઃ ।
વેદાકૃતિર્વિમલચન્દ્રનિભો હયાસ્યઃ
    પાણ્ડુપ્રફુલ્લજલજાસનસંસ્થ ઈડ્યઃ ॥ ૧૧॥

અન્તર્ધ્વાન્તં મે નાશયેદ્વાજિવક્ત્રઃ
    પ્રોદ્યત્કાન્ત્યાઽસૌ દીયતામપ્યમોઘા ।
શક્તિર્વિઘ્નાનાં ધ્વંસિની વાક્પ્રપઞ્ચે
    સર્વં ભૂયાત્તત્પ્રેમલિપ્તાક્ષિપાતાત્ ॥ ૧૨॥

શરદભ્રસમાન શરીરરુચિઃ શિતિમેઘસમાનશિરોજતતિઃ ।
ચપલાસદૃશેન્દિરયા સહિતો રમતાં હૃદયે મમ વાજિશિરાઃ ॥ ૧૩॥

ય ઉદ્ગીથરૂપસ્સિતાભ્રાભવર્ષ્મા
    ય ઓઙ્કારરૂપો રમાસઙ્ગતાઙ્ગઃ ।
સ મે જ્ઞાનરૂપં તમઃ પ્રોચ્છિનત્તુ
    સ મે સર્વ સમ્પદ્વિવૃદ્ધિં તનોતુ ॥ ૧૪॥

પ્રભુહયાનનમીડિમહે સદા વિભુરસૌ મમ બોધયતાદ્ગિરમ્ ।
ન ભુવિમાદૃગનાથજનાવનાત્ સ્વભુવ આત્મસમાદિતરદ્ભવેત્ ॥ ૧૫॥

ત્ર્યાત્મકં પ્રણવરૂપમુદારભાવં
    ઉદ્ગીથ વેદતતિમૂલ વિગીયમાનમ્ ।
વિશ્વોત્તરાકૃતિ હયાનનમિન્દિરાભૃત્

શુભ્રં કિમપ્યતિજગત્ પરધામ નૌમિ ॥ ૧૬॥

હયાસ્ય મીડીમહિ ધામ હૃદ્યં આજ્ઞાન તામિસ્ર સહસ્રરશ્મિ ।
ક્રીડા વિભક્તીકૃત કૈટભાસુ લક્ષ્મીધરં શાશ્વતમદ્ય કિઞ્ચિત્ ॥ ૧૭॥

દલન્નલિનપેશલં સનલિનાક્ષમાલં કરં
દધચ્છતમખારિભેદન જયશ્રિયં દક્ષિણમ્ ।
ભજજ્જગદપારનિર્ભયદ મીડ્યસવ્યાખ્યકં
ભજન્તિ મુનયસ્સદા ય મિતરાનપેક્ષં સ્તુમઃ ॥ ૧૮॥

સવ્યં કરં દક્ષિણ માશ્રિતાનાં સપુસ્તકં વાર્ધિસુતાવલમ્બિ ।
જ્ઞાનપ્રદં રમ્યમિભેન્દ્રતુણ્ડદ્યુતિં ભજામોઽશ્વમુખસ્ય નિત્યમ્ ॥ ૧૯॥

મથિતદિતિજસૈન્યં પાઞ્ચજન્યં દધાનં
પવનસખશિખાભૃચ્ચક્રમત્યુગ્રવક્રમ્ ।
ભુજયુગમવતાન્ન સ્સવ્યસવ્યેતરાખ્યં
ભજતિ યદમરાણાં બૃન્દમશ્વાનનસ્ય ॥ ૨૦॥

એવં હયાનનસ્તોત્રં ભક્ત્વા કૃત્વાઽર્પય દ્વિભોઃ ।
પાદયોસ્તત્સતાં પ્રીત્યૈ ભવેદેતત્પદે રતાઃ ॥ ૨૧॥

શ્રીમતે હયવક્ત્રાય શ્રિતરક્ષણદીક્ષિણે ।
શ્રિયાઽઽલિઙ્ગિતપાર્શ્વાય મઙ્ગલં નિત્યમઙ્ગળમ્ ॥ ૨૨॥

ઇતિ શ્રીહયાનનવિંશતિસ્સમ્પૂર્ણા ।

Proofread by Chandrasekhar Karumuri

*Shri Hayanana Vimshatih*
pdf was typeset on September 24, 2023

Please send corrections to *sanskrit@cheerful.com*